जून तः जुलाई २०२२ पर्यन्तम्

ज्येष्ठ-शुक्ल-द्वितीया तः श्रावण-शुक्ल-द्वितीया पर्यन्तम्

(वै-२०७९)

RNI
DELSAN/2013/50379

ISSN:2347-1565

# संस्कृत-चन्द्रिका

## मासिकी संस्कृत-बालपत्रिका

वर्षम्-९ संयुक्ताङ्कः-११-१२

सम्पादकः
डॉ. अरुण कुमार झा
सचिवः

एक साहित्यिक त्रैमासिक पत्रिका

एवं

समकालीन साहित्य के रचनात्मक मूल्यांकन की जीवन्त प्रस्तुति

तथा

सम्पूर्ण देश के प्रसिद्ध साहित्य-साधकों के साथ-साथ नवोदित प्रतिभाओं की सशक्त लेखनी की संयुक्त प्रस्तुति

# " संस्कृत मञ्जरी"

(आई.एस.एस.एन–2278–8360)

संस्कृत भाषा और साहित्य के प्रचार–प्रसार हेतु सतत प्रयत्नशील दिल्ली संस्कृत अकादमी, दिल्ली सरकार द्वारा प्रकाशित एक ऐसी सम्पूर्ण साहित्यिक पत्रिका जो सहज मानवीय संवदेनाओं, शोध–निबन्धों तथा उदात्त जीवन–मूल्यों का अनूठा संगम और प्रत्येक वर्ग के पाठक–समुदाय की अपेक्षा के अनुकूल पठनीय एवं संग्रहणीय है।

मूल्यः– एक प्रति रु. 25/– मात्र, वार्षिक सदस्यता शुल्क रु.100/– मात्र

सुरुचि सम्पन्न स्वस्थ सकारात्मक अभिव्यक्ति की संवाहिका

# " संस्कृत मञ्जरी"

के स्थायी अध्येता बनें।

आज ही अपना वार्षिक सदस्यता शुक्ल नगद, मनिआर्डर अथवा दिल्ली में भुनाये जाने योग्य बैंक ड्राफ्ट दिल्ली संस्कृत अकादमी के नाम से भिजवाकर सदस्यता प्राप्त करें। शुल्क मल्टी सिटी चैक द्वारा भी स्वीकार्य होगा।

पत्र व्यवहार का पता --

सचिव/ सम्पादक, दिल्ली संस्कृत अकादमी, दिल्ली सरकार

प्लाट सं.–५ झण्डेवालान, करोलबाग, नई दिल्ली–११०००५

दूरभाष सं.– ०११–२३६३५५९२, २०९२०३६३

ISSN-2347-1565

मूल्यम्- २५ रूप्यकाणि

# संस्कृत-चन्द्रिका

## 'मासिकी संस्कृत-बाल-पत्रिका'

जून तः जुलाई
२०२२ पर्यन्तम्

वर्षम्-९-संयुक्ताङ्कः-११-१२

**(ज्येष्ठ-शुक्ल-द्वितीया तः
श्रावण-शुक्ल-द्वितीया
पर्यन्तम्)**

**(वै० २०७९)**

**सम्पादकः**
**डॉ. अरुणकुमार झा**
**सचिवः**

**सहायकसम्पादकः**
**प्रद्युम्नचन्द्रः**

**सम्पादक सहायकः**
**मनोज कुमारः**

**आवरण/सज्जा**
**श्रीमती पूजा गड़ाकोटी**

| क्र.सं. | अनुक्रमणिका | | पृष्ठ-संख्या |
|---|---|---|---|
| १. | सम्पादकीयम् | | III |
| २. | केदारायणम् | प्रो. वनमाली विश्वालः | १ |
| ३. | भारतस्य वैभवम् | ,, | २ |
| ४. | रम्यप्रभातः | डॉ. देवीसहाय पाण्डेयः | ६ |
| ५. | जागरणगीतम् | ,, | ७ |
| ६. | काकोऽपि हंसायते | डॉ. श्रेयाशः द्विवेदी | ८ |
| ७. | कारवेल्ल! | डॉ. प्रीति आर. पुजारा | ९ |
| ८. | शिक्षिका | ,, | १० |
| ९. | अथ भरतत्रिकम् | डॉ. सिद्धेश्वरो बलराममहाराजः | ११ |
| १०. | इजरायलदेशः तस्य संक्षिप्तपरिचयश्च | श्री प्रदीप कुमारः | १३ |
| ११. | चतुरो वायसः | श्री मेवाराम कटारा पङ्कः | १४ |
| १२. | विश्वासघातकानामेष पन्थाः | श्री ओम् प्रकाश ठाकुरः | १६ |
| १३. | वृद्धाया हृदयपरिवर्तनम् | डॉ. केशवरामः शर्मा | १८ |
| १४. | होम-रूल-आन्दोलनम् | श्री दिनेशः शर्मा | २० |
| १५. | वर्तमान समये वेद-वेदाङ्गस्य महत्त्वम् | आचार्यः मनोज कुमार डिमरी | २२ |
| १६. | व्यावहारिक-संस्कृत-शिक्षणम् | ,, | २४ |

**दिल्ली संस्कृत अकादमी**
(राष्ट्रिय राजधानी क्षेत्रम्, दिल्लीसर्वकारः)
DELHI SANSKRIT ACADEMY
(Govt. of N.C.T. , Delhi)
**ई-पत्रिका**

## प्रकाशकः

सचिवः

दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः

प्लॉट सं०-५, झण्डेवालानम्, करोलबागोपनगरम्, नवदेहली-110005

दूरभाषः - 011-23635592, 20920363

## सदस्यताशुल्कम्

प्रति-अङ्कम् : 25 रूप्यकाणि

वार्षिकम् : 250 रूप्यकाणि

ISSN : 2347-1565

©दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः

©Delhi Sanskrit Academy, Govt. of N.C.T of Delhi

शुल्कप्रदानप्रकारः

बैंकधनादेशः (डी०डी०), डाकधनादेशः (मनिआर्डर) अथवा सी०टी०सी० चैक माध्यमेन (दिल्लीसंस्कृतअकादमीपक्षे)

Mode of payment:
Demand Draft, Money order or by CTC Cheque
( In favour of Delhi Sanskrit Academy)

E-mail Id : sanskritpatrika.dsa@gmail.com
sanskritprakashan.dsa@gmail.com
Website : https://sanskritacademy.delhi.gov.in

# सम्पादकीयम्

**अयि सुरवाणीसमुपासकाः सहृदयाः!**

अयि संस्कृतसमाराधानतत्पराः! किं वा ब्रूम संस्कृतवैभवम्। निरतिशयं पूर्वस्मात् समयात् प्रवर्तमानाः संस्कृतस्रोतसो धारा विधुनीते मानवमानसपापानि इति नास्त्यविदितं विदुषाम् इह विरिञ्चिचर्चिते लोकप्रपञ्चे। तच्च अधुनापि संस्कृतमेव शोधयति आधुनिकान् जनान् स्वकीयसंशोधनप्रक्रियया। तथा ब्राह्मण-क्षत्रिय-वैश्य-शूद्राः इति प्रकारेण जातयो भिद्यन्ते तेषां कर्माणि च भिद्यमानानि दृश्यते। तद्वत् सांस्कृतिकपरम्परासु निगमागमादीनाम् अपि यथास्थानम् आधुनिकरीत्या परिवर्तनं परिपालनम् उचितमेव वरीवर्ति। तदर्थं लोकेऽस्मिन् प्रयतन्ते नैकाः साधिष्ठा स्वकर्तव्यपरायणाः मनीषिणः। ते च साहित्यदिशा कथादिशा भाषणदिशा उपदेशदिशा वा यथाथलोककलां प्रसार्य प्रवर्तयन्ति मनुजान् प्रवर्तनीयसंस्कृतमार्गे प्रवर्द्धयन्ति च तेषु ज्ञानकलाकौशलम्। विशदयन्ति च विवेककलां लोके। वयमपि सुरभारतीसेवकाः इति महद् गौरवास्पदं प्रकाशनम्। सततम् अस्माभिरपि तेषां कायेन वाचा मनसा वा साहाय्यं विधाय बद्धकटीभूय निरन्तरम् आधुनिकयुगस्य संस्कारसिद्ध्यर्थं संस्कृतसपर्या अवश्यं करणीया। तेन अवश्यमेव लोकोऽसौ प्रतिष्ठते महिष्ठपदवीम् इति नास्ति विपश्चितामज्ञातमिति शम्।

भावत्कः

**शकाब्दः १९४४** **डॉ. अरुणकुमार झा**

सचिवः

# केदारायणम्

-प्रो. बनमाली विश्वालः

## मङ्गलाचरणम्

वन्दे केदारनाथन्तं वन्दे केदार-पञ्चकम् ।
केदारेशं मुदा वन्दे केदारेश्वरसंज्ञितम्॥१॥
आदौ मुख्यं केदारन्तं मध्यमहेश्वरं ततः।
तुङ्गनाथं ततो वन्दे रुद्रनाथं ततः परम् ॥ २ ॥
ततः कल्पेश्वरं वन्दे केदारेषु च पञ्चमम् ।
केदाराणां प्रणामैस्तु भुक्तिः मुक्तिश्च सम्भवेत् ॥३॥
वन्दे महिषरूपन्तं केदाराद्रिनिवासिनम्।
महिषमध्यरूपन्तं नौमि मध्यमहेश्वरम् ॥४॥
महिषभुजरूपश्च तुङ्गनाथःप्रणम्यते।
महिष-मुखरूपोऽथ रुद्रनाथस्समर्च्यते ॥ ५॥
नौमि कल्पेश्वरं देवं कल्पस्थल-निवासिनम्।
नमामि च जटारूपं केदारेषु तमन्तिमम् ॥६॥
निष्प्रपञ्चं प्रपञ्चेषु बन्धनानां विमोचकम्।
वन्दे भावातीतं देवं तर्कातीतं नमाम्यहम् ॥७॥
अर्धमुदितनेत्रन्तं जटाचन्द्रावतंसकम्।
गङ्गाधरं त्रिनेत्रञ्च वन्दे सदाशिवं हरम्।८।
पार्वती-वल्लभं नौमि नित्यं कैलासवासिनम्।
कुमार-पितरं वन्दे गणेशस्याभिभावकम् ॥९॥
नीलकण्ठं सदा वन्दे भस्माङ्गरागलेपितम्।
शम्भूञ्च शङ्करं वन्दे ध्यानमुद्रा-सुशोभितम् ॥१०॥
भोगमोक्षप्रदातारं केदारेशमुपास्महे।
पातु केदारनाथोस्मान्केदारेशः प्रचोदयात् ॥११॥

# भारतस्य वैभवम्

-प्रो. वनमाली विश्वालः

## भारततीर्थ-प्रशस्तिः

भारतस्य प्रतिक्षेत्रं तीर्थायितं न संशयः।
भारतं तीर्थमेवास्ति कथनं न दोषायितम् ॥१॥
पवित्र-भावनाऽस्माकं येन क्षेत्रेण संयुता:।
तस्य क्षेत्रस्य तीर्थत्वे कस्य वा विमतिः कथम् ॥२॥
तीर्थानि भारतस्यास्य प्राणभूतानि सन्ति वै।
पवित्राणि च तान्येव धर्म-ग्रन्थानुसारतः ॥३॥
प्रायशस्तीर्थयात्राभिः दैविक्यास्था प्रजायते।
चरित्राणां विकासोऽपि सम्भवति च सर्वथा ॥४॥
सर्वा भारतभूमिश्च तीर्थैः पूर्णा न संशयः।
तेषु नैकानि तीर्थानि देवैः प्रतिष्ठितानि वै ॥५॥
कानिचनात्र तीर्थानि भवन्त्येतादृशानि वै ।
भगवान् यत्र भक्तांश्च धन्यांश्चकार दर्शनैः ॥६॥
दर्शनेनैव तीर्थानां तादृशानां विशेषतः।
पुण्यभाजोऽत्र भक्ताश्च फलं लभन्ते वाञ्छितम् ॥७1।
कोटिशो भारतस्यैव धर्मपरायणा जनाः।
कष्टं सोढ्वाऽपि तीर्थानां कुर्वन्ति दिव्य-दर्शनम् ॥८॥
आध्यात्मिक्या च धार्मिक्या सांस्कृतिक्या दृशा पुनः
अस्ति स्थानं विशिष्टञ्च संसारे भारतस्य वै ॥९॥
देवास्सन्त्यत्र यावन्तो न तावन्तस्तु कुत्रचित्।
अतोऽस्य देवभूमित्वे गणनं सर्वथोचितम् ॥१०॥
प्रकारार्थे च कोटेस्तु प्रयोगश्चास्ति संस्कृते।
त्रयस्त्रिंशत्प्रकाराश्च सन्त्यन्यूनाः न संशयः ॥११॥
स्वेष्टदेवं समर्चन्ति सर्वे स्वमान्यतादृशा।
न कस्य केन देवेन विरोधोऽप्यत्र दृश्यते ॥१२॥



अतो भाग्योदयो यस्य मनुष्यस्य भवेत् क्वचित्।
तस्य जन्म पवित्रेऽस्मिन् भारते चैव सम्भवेत् ॥१३॥
भूमिरेषा च सामान्या भारतस्य न मन्यते।
यतोऽस्य धर्मभूमित्वं प्रसिद्धञ्च भूमण्डले ॥१४॥



अत्रानेकैस्तु देवैश्च सन्तोऽनेके च साधवः।
स्वयं जन्म गृहीत्वैव वर्धितं राष्ट्रगौरवम् ॥१५॥
एषा संस्कार संस्कृत्योः भूमिरिति न संशयः ।
संस्कृतिः भारतीया च प्रान्त-संस्कृति-मिश्रिता ॥१६॥

# भारतस्य प्रमुख-शैवपीठानि

भारते सुप्रसिद्धानि शैवपीठानि कानिचित्।
ज्योतिर्लिङ्गानि तेष्वेव प्रमुखानि च सर्वथा ॥१॥
द्वादशशैवपीठेषु ज्योतिर्लिङ्गेषु तेषु च।
वर्त्ततेऽनन्यथासिद्धः केदारेशस्तु भूतले ॥२॥
स च केदारनाथस्तु क्रमादेकादशो मतः।
प्राधान्यन्तस्य चाराष्ट्रं समग्रे च भूमण्डले ॥३॥
यदा प्रथमवारञ्च कृतं तद्दर्शनं मया।
तदा मनसि सङ्कल्पः कृतश्चरितलेखने ॥४॥
ततोऽग्रे नैकदेवानां कृतं मया तु दर्शनम्।
चरितमपि तेषाञ्च काव्येषु लिख्यते मया ॥५॥
इदानीन्तु कृपा तस्य विशिष्य समजायत।
चरितं तस्य काव्येस्मिन् प्रस्तूयते यथार्थतः ॥६॥
वर्ण्यन्ते किन्तु सर्वादौ ज्योतिर्लिङ्गानि तानि वै।
उत्तराखण्डराज्यस्य शिवालयास्ततः परम् ॥७॥

## द्वादश ज्योतिर्लिङ्गानि

ज्योतिर्लिङ्गानि सन्त्येव द्वादशानीह भूतले।
स्मरणमेव तेषाञ्च कोटिपातक-नाशकम् ॥८॥
सोमनाथायने काव्ये कृतं विशिष्ट-वर्णनम्।
मया संक्षिप्य किन्त्वत्र किञ्चिदेव निवेद्यते॥९॥



## सोमनाथः

गुर्जर सोमनाथश्च वेरावले प्रभासके।
यस्य दर्शनमात्रेण रोगनाशो भवेद् ध्रुवम्॥१०॥

## मल्लिकार्जुनः

आन्ध्रे विराजते देवः श्रीशैले मल्लिकार्जुनः।
मार्गो भयप्रदश्चात्र दर्शनं कष्टदं क्वचित् ॥११॥





## महाकालः

उज्जयिन्याञ्च देवस्तु महाकालो विराजते।
शिप्रानदी-तटे तस्य भाग्यभाजाञ्च दर्शनम् ॥१२॥

## अमलेश्वरः



एवं मध्यप्रदेशेस्ति प्रसिद्धश्चामलेश्वरः
ओंकारेश्वर-नाम्नोऽपि प्रसिद्धिस्तस्य विद्यते॥१४॥

## वैद्यनाथः

झार्खण्डे तु परल्याञ्च वैद्यनाथस्तु राजते।
अस्य स्थानविषये च मतभेदोऽपि दृश्यते ॥१५॥

## भीमशङ्करः

डाकिन्यां महाराष्ट्रे च सह्याद्रौ भीमशङ्करः।
आसामे कामरूपेऽपि नैनितालेऽपि कुत्रचित् ॥१६॥



## रामेश्वरः

तामिले सेतुबन्धे च तीर्थे रामेश्वरः पुनः।
यस्य दर्शनमात्रेण मुक्तिस्संसारसागरात् ॥१७॥

## नागेशः



महाराष्ट्रे नागेशश्च शोभते दारुकावने ।
एवं नागेश्वरोऽप्यस्ति हैद्राबादेऽपि कश्चन ॥१८॥

## विश्वनाथः

वाराणस्यान्तु काश्याञ्च विश्वनाथस्तु मोक्षदः।
विश्वनाथ-त्रिशूले च वाराणसी प्रतिष्ठिता ॥१९1।

## त्र्यम्बकेश्वरः

नासिके च महाराष्ट्रे प्रसिद्धस्त्र्यम्बकेश्वरः।
गोहत्या-पापनाशाय तद्दर्शनं विशिष्यते ॥२०॥

## केदारनाथः



एवं केदारनाथोपि विराजते हिमालये।
आराधनेन चास्यैव फलं लभ्यं यथेप्सितम् ॥२१॥

## घुश्मेशः

वेरुले महाराष्ट्रे च घुश्मेशस्तु विराजते।
अस्य दर्शनमात्रेण पुत्रप्राप्तिर्न संशयः ॥२२॥

-निदेशकः (शैक्षिक वृत्तम्)
केन्द्रीय संस्कृतम् विश्वविद्यालयः
जनकपुरी, नवदेहली

# रम्यप्रभातः

-डॉ. देवीसहाय पाण्डेयः

उदितः सूर्यो मुदितः लोकः
प्रसरति सुकारी आलोकः।
विगतं तमः न किञ्चित्शोकः
विचरति लोके जनः विशोकः॥



कूजति गायति बालविहङ्गः
विकसितकमले गुञ्जितभृङ्गः।
सरसस्तीरे निर्मलनीरे
विलसति मञ्जुलतरलतरङ्गः॥

मन्दं मन्दं वहति समीरः
श्रमं करोति कृषक अतिधीरः।
क्षेत्रं कर्षति हृष्यति भूयः
बीजं वपति न भवत्यधीरः॥

श्रेष्ठबालकः शय्यां त्यक्त्वा
नमति गुरुन् समीपं गत्वा ।
पाठं पठति च लिखति सुलेखं
योग्यः भवति पाठनं श्रुत्वा ॥



# जागरणगीतम्

-डॉ. देवीसहाय पाण्डेयः

निशा गता आगतं प्रभातम् ।
पश्यत ! नवं जागरणं जातम् ॥
मन्दं मन्दं प्रवहति वातम् ।
निशा गता आगतं प्रभातम् ॥

बालविहगवृन्दे जागरणम् ।
पश्यत जने जने जागरणम् ॥
सृष्टेः कणे कणे जागरणम् ।
परितः क्षणे क्षणे जागरणम् ॥
निशा गता आगतं प्रभातम् ।
पश्यत! नवं जागरणं जातम् ॥



-दीपलोकः लवकुश नगरम्
रामघाटः, अयोध्या,
उत्तरप्रदेशः

# काकोऽपि हंसायते

-डॉ. श्रेयाशं द्विवेदी

मूषो यत्र विडालवद् व्यवहरन् लोके दरीदृश्यते,
सोऽसौ तत्र विडालनामचतुरः सिंहायते सर्वथा।
प्रायो दुष्टजनः सठस्तु नितरां सत्यायते मानवः,
उक्तं मान्यवरैः सदा कलियुगे काकोऽपि हंसायते ॥१॥



नित्यं धर्मपरायणो ह्यभिनवः श्रद्धारतो मानवः,
राष्ट्रं यातु समुन्नतिं प्रतिदिनं तत्कर्तुमीहे सदा।
भोगायैव पदं मिलेत्कथमपि सञ्चिन्तयन्स्वार्थगः,
को धर्मः परिहाय दुर्मतिखलः काकोऽपि हंसायते॥२॥

वाणी यस्य सुसंस्कृता हृदि सदा संराजते वाङ्मयम्,
दिव्यं भाभरितं सुपावनमिदं ऋष्यादिभिः प्रापितम्।
पारम्पर्यमनारतं समधिकं प्रामाणिकोपाधयः,
अस्वीकृत्य जनः सदैव विमतिः काकोऽपि हंसायते ॥३॥

यः बाल्यात् कृषिकर्मणस्तु मनसा ज्ञाता तपस्वी सुधीः,
बालः तस्य कदाचिदेव पठितुं याति स्वयं चिन्त्यताम्।
स्वं स्वं कर्म विहाय यान्ति मनुजाः लक्ष्यं तपः नाधिकम्,
तस्मादेव महाजनैस्तु कथितं काकोऽपि हंसायते ॥४॥

संस्थानेषु महद्धनं सुकरं संसाधनं विद्यते,
कोषाद्रव्यमवाप्य नैव चरितं किञ्चित्तपः कर्मिभिः।
मान्याः भो जननायकाः समधिकं सञ्चिन्त्यतां सर्वदा,
लोकोक्तिः कथिता हि केन च कथं काकोऽपि हंसायते॥५॥

-गीताधाम,१०४ हाउसिंग बोर्ड कालॉनी,
सैक्टर-७, गुरुग्राम:-१२२००१

# कारवेल्ल!

-डॉ. प्रीति आर. पुजारा



कारवेल्ल! कथय कथय कथमप्रियं बालानां ।
हरितवर्णं कलेवरं ते लघुपुच्छमति रमणीयम् ॥

गुणकारी त्वं स्वास्थ्यदृष्ट्या कथयत्यम्बा प्रतिदिनं ।
किन्तु भ्रातः! सत्यं वच्मि बालास्तु मधुस्वादप्रियाः ॥

आलुकमति रोचते मह्यं रोचते भेण्डी प्रतिदिनं ।
कटुस्वादेन पलायनपरा बाला जानीहि सत्यमिदम्! ॥

पितामहो न जाने कथं पिबति निर्यास्सते मुदा ।
पितामही लाभान् तव भो! गायति वर्णयत्यादिनम्॥

गुडेन सह वा शर्करया नाहं शक्नोमि भोक्तुं ।
वचनानि स्वीकुरु मम, कर्णं दत्वा शृणु सखे॥

मिष्टिकाया मधुररसैः पूरय तवोदरं सकलं।
बालास्सकले भवितारः कारवेल्लप्रियाः सद्यः॥



# शिक्षिका

–डॉ. प्रीति आर. पुजारा

शिक्षिका सञ्जाता शिक्षिका सञ्जाता ।
तनया तव अम्बि अद्य शिक्षिका सञ्जाता ॥

शाटिकां नूतनां धारयति सा ।
उपनेत्रं धृत्वा पाठयति सा ॥

समयबद्धेयं शिक्षिका जननि ।
विलम्बेन वर्गं न याति कदा ॥

सदाचारं वर्गमध्ये शिक्षयति सा ।
गायति काव्यानि छात्रैः सह ॥

चेष्टालु छात्रेभ्यः कुप्यति कदा ।
तेजस्वीछात्रान्प्रशंसति सदा ॥

तनयायाः कक्षायां जननि अद्य ।
स्वागतं विधेयं भवत्याः सद्यः ॥

पाठयति प्रतिदिनं तनयां भवती ।
अद्याहं चल जननि पाठयामि त्वाम् ॥

शिक्षिका सञ्जाता शिक्षिका सञ्जाता ।
तनया तव अम्बि अद्य शिक्षिका सञ्जाता ॥



–सहायकाचार्या, संस्कृतविभागः
डी.सी.एम. कला-वाणिज्य महाविद्यालयः
वीरमगाम -अहमदाबादः- गुजरातप्रदेशः

# पद्यमयं वन्दनम्

-डॉ. सिद्धेश्वरो बलराम महाराजः

## अथ भरतत्रिकम्



स्वायम्भुवमनोर्वंशे ऋषभो नाम भूपतिः ।
तस्य पुत्रोऽभवन्नाम भरतो मेदिनीपतिः ॥१॥
सुष्ठु तस्य नृपस्यासीद् शासनं लोकतुष्टिदम् ।
अजनाभं वर्षमेतत् ख्यायते भारतं यतः ॥२॥



दौष्यंतिर्भरतो नाम नृपः शाकुन्तलो महान् ।
अश्वमेधैर्महायज्ञैर् हरिंयोऽतोषयद् भृशम् ॥३॥
तृतीयो भरतो राजा दशरथसुतः प्रियः ।
रामस्यार्थेऽत्यजदूराज्यं तपो घोरं समाचरत् ॥४॥



वंदनीयं सदा भक्तैभरतत्रिकमिदं शुभम् ।
स्मरणात्सर्वभक्तानां सदाचरणचोदकम् ॥ ५ ॥

## ॥ अथ रामत्रयम् ॥



जमदग्न्यात्मजः शूरः परशुराम इति श्रुतः ।
क्षत्रियान्तकरः श्रीमान् रेणुकानन्दनो हरिः ॥ १॥
रामो दाशरथिर्वीरो रावणान्तकरो महान्!
अयोध्याधिपतिर्भूपः कौसल्यानन्ददः प्रभुः ॥२॥



रो[illegible] कृष्णभ्राता गदाधरः ।
कृष्णप्रियकरो नित्यं बलोऽसौ रेवतीपतिः ॥ ३॥
सङ्कर्षणेति विख्यातः शूरोवीरो हरिप्रियः ।
एतद्रामत्रयं पुण्यं स्मरणात्पापनाशनम् ॥४॥



## ॥ अथ कृष्णमयी ॥

सत्यवतीसुतः कृष्णो महा भारतलेकः ।
वेदाम् चतुर्धान्यभजत्तत्प्रचारं चकारें यः ॥ १॥

॥ पद्यमयं वन्दनम् ॥



ब्रह्मसूत्रप्रणेताऽयं वन्दनीयोऽनिशं जनैः।
प्रणीय श्रीभागवतं पतितानुद्दधार सः ॥२॥
कृष्णौऽसौ देवकीपुत्रो वासुदेवो हरिः परः ।
गीतोपदेष्टा भगवान् गोगोपीजन वल्लभः ॥३॥
कृष्णः कुन्तीसुतो वीरो द्रोणशिष्योऽर्जुनः किल ।
धर्मप्राणोधर्मबन्धुः पाञ्चाल्याश्च प्रियङ्करः ॥४॥
एतत्कृष्णत्रयं लोके स्मरणीयं सदा शुभम्।
कृष्णत्रयी सदा सेव्या वन्दनीयतमाऽशिशम् ॥५॥
सिद्धेश्वरो रामकृष्ण-भरतानां वशंवदः ।
अरीरचत् पद्यमयं वन्दनं धर्मवर्धनम् ॥ ६॥





-श्रीनाथ मन्दिरम्
मु.पो.ता. उमरगा,
जनपदम्-उस्मानाबादः - ४१३६०६

# इजरायलदेशः तस्य संक्षिप्तपरिचयः

-प्रदीपकुमारः

इजरायलदेशः विश्वस्य कश्चन लघुः देशः तस्य जनसङ्ख्या अतीव न्यूना, अर्थात् तस्मिन् देशे प्रायः नवतिलक्षजनाः निवसन्ति। इजरायलदेशे यहूदीजनाः निवसन्ति। ते अत्यन्तं शक्तिशालिनः साहसिनः च भवन्ति। अर्थात् तेषाम् आत्मविश्वासः अतीव दृढः। यहूदीजनान् समूलं नाशयितुं हिटलरः प्रयत्नं कृतवान्, बहून् जनान् च सः अहन् चेदपि अधुना ते अल्पसङ्ख्यकाः स्वतन्त्रदेशे निवसन्ति। तं देशं परितः मुस्लिमदेशाः सन्ति ये इजरायलदेशस्य शत्रवः सर्वदा तं नाशयितुं प्रयतन्ते परन्तु इजरायलदेशस्य किमपि कर्तुं न शक्नुवन्ति ।

इजरायलदेशस्य प्रत्येकं नागरिकाः सैनिकाः भवन्ति। तस्य देशस्य सर्वकारः प्रत्येकं नागरिकाय सैन्यप्रशिक्षणं ददाति। आधुनिकप्रौद्योगिक्याः कारणात् इजरायलदेशेन उन्नतशस्त्राणि निर्मितानि सन्ति इति कारणतः ते पृथिव्यां जीविताः सन्ति, अन्यथा तेषां समूलनाशः अभविष्यत्। तस्य देशस्य उपरि यदि कश्चन शत्रुदेशः आक्रमणं करोति तर्हि सः तत्क्षणं हि प्रत्याक्रमणं कृत्वा तं शमयति। तदानीं सः कस्यापि देशस्य ईश्वरस्य वा प्रतीक्षां न करोति यत् सः आगत्य अस्मान् रक्षिष्यति इति।

तस्य देशस्य एषा एव नीतिः इति कारणतः देशस्य नागरिकाः सर्वे सुखे जीवन्ति, शत्रुदेशाः च तस्मात् भीताः भवन्ति।




**साहसं नाम सुरक्षा, दुर्बलता नाम मृत्युः।**

-जिला-काजीरंगा
आसम्

# चतुरो वायसः

**–मेवाराम कटारा पङ्कः**

ग्रामादानीतमेकं रोटिकाखण्डं चञ्चौ गृहीत्वा सघनच्छायोपेतस्य वृक्षस्य हरितपत्रावल्यां पुष्पपूर्णायामेकां शाखायां सुखेनासीनं सुस्वादेन खादन्तं काकमेकमति लालसया पश्यता लोलुपेन जम्बुकेनोक्तम्–

''काक पितृव्य! मयाश्रुतं यत्त्वं गीतमतिमधुरं गायसि ।''

''समुचितमेव श्रुतंत्वया।'' इति काकेल उदतरत्।।

''तर्ह्येकं मधुरतमं गीतं श्रावयित्वा अनुगृह्णातु मां भवान्'' शृगालेन निवेदितम्।

काको रोटिका खण्डं पादयोरधः संस्थाप्य 'काँव काँव' इति गायति' शृंगालोऽचिन्तयत्– यदनेन तु न पातितः रोटिका खण्डः तदाहमन्यमुपायं चिन्तयामि।'' क्षणं विचिन्त्य– ''आम् आगतः स्मृतिपथं नूतनोपायः, एवं करोमि नैराश्योपेतः शृगालोऽसौ वञ्चनापूर्णवचनमब्रवीत–''तात! मया श्रुतं यत्त्वं सतालं नृत्यमपि जानासि।''

''आम्, यत्त्वया श्रुतमासीतत्सत्यमेव। एवमुक्तवासौ काकः रोटिका–खण्डं चञ्चौ गृहीत्व नृत्यति–ता थेई ता थोई ता' इति। ''अहो नैष इदानीमपि रोटिकाखण्डं पातितवान्'' इति चिन्तयन्नसौ धूर्तः शृगालोवारमेकं पुनरपि प्रायततावदच्च– ''तात! मयाश्रुतं यत्त्वं सलयं गायन्नपि सतालमति मधुरं नृत्यसि। अतो नृत्येन सह गीत्वैवानुगृह्णन्तु मां भवन्तः। एवं मनोरमं नृत्यमवलोक्य मधुरं गीतं च श्रुत्वात्या–नन्दितोऽहं भविष्यामि, मन्येऽहं यदेतेऽन्तेऽपि जन्तव आनन्दमनुभविष्यन्ति'' इति ।

स्वस्थानपेक्षितां श्लाघां श्रुत्वा काकोऽप्यति प्रहृष्टमनाः सन्नवदत्–''आम्, त्वयेदमपि सम्यगेव श्रुतं यदहं गीतस्य लयेन सह सतालं सुन्दरं नृत्यामि।'' रोटिकाखण्डं वृक्षस्य कोठरे निक्षिप्य विगतचिन्तरसन् सतालं नृत्यति गायति सलयम्।

एवं कृतेऽपि यदा रोटिकाखण्डं शृगालो न प्राप्तुमशक्नो त्तदाऽसौ शृगालस्ततो यावत्पलायितुमुद्यतो भवति तावत्काको ब्रूते–'' तिष्ठ जम्बुक! न केवलमियदेवाहं जानामि, इदानीन्त्व त्वां दर्शयिष्यामि यन्नृत्यन् गायन्नेवान्यस्यापि रोटिका कथमाच्छिद्यते। ततश्चलन्नेन शृगालोबत–''वाढं काऽवद काक पितृव्य! वाढम्, विगतचिन्तोऽस्म्यहं सञ्जातः। एतदेव ज्ञातुमहमत्रागतोऽस्मि यत्त्वं स एव ईसपकालीनोऽसि नवीन युगानरूपो वा जातः तत्काले त्वहं तवार्जवं निर्व्याजतां च ज्ञात्वा तल्लाभं च प्राप्याहं तवरोटिकाखण्डं वञ्चयित्वाऽऽच्छिद्यनीतवान्। परञ्चाद्यस्मिन् तथाकथिते प्रगतिशीले वञ्चन–पूर्णे युगे तु धूर्ताः त्वां सर्वमेव वञ्चयित्वा ग्रसिष्यन्ते। इदानीं धन्यवादार्ह्ये भवाव् प्रगतिपथानुसरणत्वात्।'

यद्येवं तर्ह्यागच्छ मित्रश्रृगाल, अत्रैय तिष्ठ। अहमवतरामि वृक्षात्। अद्यत: आवां मिले जातौ। रोटिकामिमामुभावेव मिलित्वा खादिष्याव:। त्वमपि बुभिक्षितोऽसि। मित्र, मया अन्येषां बुभुभुक्षापि चिन्तनीया। ''अनुगृहीतोऽहं यत्त्वं मां सम्यक् समुपदिश्य सचेतं कृतवान्। यद्यप्यावामुभावपि धूर्तरूपेण ख्यातो स्व: कथाग्रन्थेषु परञ्चाद्य तु मानव: आवाभ्यामपि धूर्ततर: सञ्जात:।



-३६, जसवन्त नगरम्
प्रदर्शनीमार्ग: भरतपुरम् ३२१००१,
(राजस्थानम्)

# विश्वासघातकानामेष पन्थाः

**–ओम्प्रकाश ठाकुरः**

कृष्णदेवरायः तेषु दिनेषु रायचूर–बीजापुर–गुलबर्गाराज्येषु आक्रमणार्थं सन्नद्ध आसीत्। तेन राज्यपाल आदिष्टः यत् स सैन्याय धनस्य जनबलस्य च साकल्येन व्यवस्थां करोतु, येन शत्रूणां पराभवो निश्चितः स्यात्। उडीसा–प्रदेशस्य शासकः तु पूर्वमेव तेन विजित आसीत्। अधुना मुस्लिमशासकानां दलनाय इदमभियानमासीत्।

कृष्णदेवरायस्य सैन्यशक्तिं साधनजातं सज्जां च परिज्ञाय बीजापुरस्य सुल्तानः चिन्तामापेदे। तत्प्रतिरोध–क्षमताया अभावात् स स्वपराजयम् आशङ्कते स्म। असौ एकं गूढचारिणं मुस्लिमं ब्राह्मणवेषं विधाय ''राजा अय्यर'' इति नाम कृत्वा विजयनगरं प्रेषयामास। स महाराजस्य विश्वासमुत्पाद्य अवसरं च प्राप्य तं हन्यादिति आसीत् तस्य योजना। सुल्तानश्चिन्तयति स्म, यद् राज्ञि हते तस्य शासनम् अव्यवस्थितं भविष्यति। तदा तद्राज्ये आक्रमितुमपि शक्यते।

असौ गूढचारी राजा अय्यरः वर्णेन कृष्णः, सुशिक्षितः तमिलब्राह्मणानामाचार–विचाराणामभिज्ञः, मथुराशासकानां सुल्तानां वंशजः, धर्मान्ध–मुस्लिमः, पूर्वं मथुरायां कृत–निवासश्चासीत्। तस्य हृदि प्रतिशोधानलः ज्वलति स्म, यतः विजयनगरराजभिः तस्य पूर्वजाः पराजयं प्रापिता आसन्।

तमिलब्राह्मणवद् वेषधरोऽसौ विजयनगरराज्यस्य सभां प्राप्य शुद्धं संस्कृतमवदत्, वेदान् अपठत्, शास्त्र–पुराण–रूपकादीनाम् अंशान् अश्रावयत्। विदुषां सम्भावयितुः कृष्णदेवरायस्य संसदि कृतकेन तमिलब्राह्मणेन विशिष्टं स्थानमर्जितम्। राज्ञः प्रासादे नक्तं वा दिवा वा तस्य निर्बाधः प्रवेशः आसीत्। प्रथमं तु स आशङ्कितः इवाचरत्, पश्चात् हर्म्यस्य अन्तःप्रकोष्ठेष्वपि अव्याहतगमनः संवृत्तः।

कृष्णदेवरायः यत्रापि प्रयाति स्म, तेन सह तेनालीरामः इतरे च केचन सभासदः सर्वदा सन्निहिताः भवन्ति स्म। 'राजा' किञ्चिद् विजनस्थानं गवेषते स्म, यत्र भूपतौ प्रहारः क्रियेत। किन्तु तेनालीरामं दृष्ट्वा 'राजा' उद्विजते स्म। तेनालीरामोऽपि तस्य गुप्तचरशङ्कया आशङ्कित आसीत्। असौ तस्य निग्रहोपाय–चिन्तने सक्तो जातः।

एकस्मिन् दिने राजसमक्षमेव तेनालीरामः तमपृच्छत्, कोऽस्ति भवतः वेदः गोत्रश्च? स सपदि उदतरत् कृष्णयजुर्वेदः संस्कृतिगोत्रश्च ।

अय्यरे गते राज्ञा पृष्टं, तेनालीराम! त्वयाऽयं प्रश्नः किमर्थं पृष्टः? सोऽवादीत् राजन्! अयं कश्चिद् गूढचरः – इत्याशङ्कयाऽकुलं मे मनः। अस्मिन् जने विश्वासात् पूर्वम् अस्य परीक्षा करणीया। दुर्जने कृता कृपा बहुहानिकरी भवति। राज्ञोक्तं–किं जल्पसि? तस्य मन्त्रपाठेन देवार्चनाभिश्च किं तव सन्देहो नापगतः? तेनालीरामो निजगाद–प्रदर्शनार्थमपि स एतत् कर्तुं शक्नोति।

**वेदशास्त्रादिपाण्डित्यं**
**कुलं वेषं सुभाषितं ।**
**समतीत्य गुणान् सर्वान्**
**स्वभावो मूर्ध्नि वर्तते ।।**

नृपतिरगदत् ''नूनं तव वचसि गाम्भीर्यमस्ति किन्तु मम विश्वासो न भवति। ममैकस्य हननेन किं प्रयोजनं सेत्स्यति? मयि मृतेऽपि लक्षशः मम सैनिकाः तं शत्रुम् प्रतिरोद्धुं शक्ष्यन्ति। ''तेनालीराम ऊचे-'' राजन्, सिंह एकोऽपि लक्षशः मेषाणां बलिष्ठो भवति। अविद्यमाने भवति चमूषु परस्परं भेद उत्पत्स्यते। अरातयः आक्रमणं विधास्यन्ति। यदि भवान् अनुजानातु, अहं तस्य गूढचारित्वं सिद्धं कर्तुं शक्नोमि।''

नृपोऽपृच्छत्- केन विधिना? तेनालीरामोऽवदत्-एकेन सरलेनोपायेन तस्य रहस्यं विवृतं भविष्यति। नृपोऽभणत्-अनुजाने त्वाम्। परं सर्वं मत्समक्षमेव करणीयम्। यावत् तस्यापराधो न सिध्यति, तावत् नासौ दण्डनीयः।



तस्यामेव विभावर्यां यदा अय्यरः स्वे कक्षे प्रगाढनिद्रासुमनुभवति स्म, राजा तेनालीरामश्च तत्र ययतुः। तेनालीरामेण द्रोण्याम् अतिशीतलं जलं प्रपूर्य प्रसुप्ते तस्मिन् पातितम्। सहसा शीतलेन जलाभिषेकेण विनिद्रितस्य तस्य मुखात् ''या अल्लाह'', ''या अल्लाह'' शब्दा उच्चैः उच्चारिता अभवन्। तदैव तेन खड्गमाकृष्य तेनालीरामे प्रहृतं किन्तु समुद्यतेन नृपेणापि खड्गेन तस्य शिरश्छिन्नम्

**-सरस्वती विहारः**
**नव देहली-३४**

# वृद्धाया हृदयपरिवर्तनम्

**-डॉ. केशवराम शर्मा**

एका वृद्धा एकां पोट्टलिकां गृहीत्वा निर्जनपथे मन्दगत्या गच्छति स्म। ग्रीष्मकालः, छायाविहीनः पन्था, धूलधूसरितो मार्गो, न कोऽपि सहयात्री च, सा अतीवक्लान्ताप्यासीत्। अकस्मात् तया द्रष्टो यदेको अश्वारोही। सा तस्याः समीपम् आगच्छति। वृद्धा तं सकरबद्धं निवेदयति, यत् स तस्याः पोट्टलिकां गृह्णातु। तस्यां तस्या वस्त्राणि, पात्राणि भोजनञ्च सन्ति।

मार्गस्थे प्रथमे ग्रामे एव वामपार्श्वे प्रथमगृहे एव एतां दत्वा स्वग्रामं प्रति गच्छतु। अस्यां पोट्टलिकायां ममैकं पत्रमप्यस्ति, तेन साहाय्येन अहमिमां सरलतया प्राप्स्यामि।

अश्वारोही तां हेयदृष्ट्या पश्यति, कथयति च-"अहं तव विधेयो नास्मि। य इमां ग्रहीष्यामि, तद्ग्रामं गत्वा च निर्देशितं जनं सर्वं वृत्तान्तं कथयित्वा तस्मै इमां दास्यामि।"

स तत्क्षणमेव अग्रे गच्छति। कियद्दूरं गत्वा स चिन्तयति, यत्सोऽपि कीदृशो मूर्खोऽस्ति। कथं नास्याः पोट्टलिकां ग्रहीत्वा स्वगृहं गच्छामि? वस्त्राणां पात्राणाञ्च विक्रयेण यद्धनं प्राप्स्यामि, तस्य कथमपि सदुपयोगं करिष्यामि। एषा मम कथमप्यहितं कर्तुं न समर्था। अतो गच्छामि पुनः तस्याः समीपमेव।

स तत्र गत्वा सादरं तां प्रणम्य निवेदयति-"मातः क्षम्यतां ममापराधः। अहं कीदृशो मूढोऽस्मि, येन तव वार्धक्यमपि न विचारितम्। अहं क्षमायाचनापूर्वकं भवतः सेवां कर्तुं प्रस्तुतोऽस्मि। कृपया देहि मह्यमिमां स्वपोट्टलिकाम्।"



**वृद्धा-** [उपेक्षाभावेन तं दृष्ट्वा] अहं त्वां कदापि स्वविधेयरूपेण द्रष्टुं समर्था नास्मि। क्वाहं दीना-हीना-वृद्धा नारी? क्व च भवान् धनसम्पन्नो, नवयौवनेन सुसज्जितः, अश्वारूढः भूपतिरिव शोभते। तव भावप्रवर्तनेनाहमतीव प्रसन्नास्मि। गच्छतु भवान् यथाशीघ्रं स्वगृहम्। अहमपि यथातथा गमिष्याम्येव।

**युवकः-** अहं तव स्थितिं, निवेदनञ्च दृष्ट्वा सानुक्रोशं पुनरागतोऽस्मि। देहि मां स्व सेवायाः शुभावसरम्। [चरणयोः पतति।]

**वृद्धा:-** [तामुत्थाय] मम निश्चयो दृढोऽस्ति। गच्छतु भवान्, यथाशीघ्रम्। ममावरोधं मा कुरु।

**युवकः:-** इदानीं त्वयाकस्मादेव स्व निर्णयः कथं परिवर्तितः?

**वृद्धा-** यथा त्वया स्वनिर्णयेऽकस्मादेव परिवर्तनं कृतम्।

**युवकः:-** अहं तव वृद्धावस्थां दृष्ट्वा कृपालुरस्मि।

**वृद्धा-** अहमपि तव हृदय परिवर्तनस्य कारणं जानामि। अतः शीघ्रमेव गच्छ।

**युवकः:-** त्वं मम हृदयपरिवर्तनस्य कारणं कथं जानासि?

**वृद्धा-** येन तव हृदयपरिवर्तनं कृतं, तेनैव ममापि प्रबोधः कृतः। इदानीं गच्छतु भवान्-

**[ युवकोऽवाङ्गमुस्ततो गच्छति ।]**

**-बी ५९ वीथिसंख्या-३**
**इन्दिरानिकेतनम्, उत्तरी छज्जूपुरम्**
**शाहदरा-देहली-९५**

# होम-रूल-आन्दोलनम्

-दिनेश शर्मा

होम-रूल-आन्दोलनम् अलिभारतीय-होमरूल-लीग इत्याख्यं राष्ट्रियराजनैतिकसंघटनम् आसीत्। यस्य स्थापना १९१६ तमवर्षे बालगंगाधरतिलकेन भारते स्वशासस्थायनार्थं राष्ट्रयाच्आनेतृत्वाय 'होमरूल' इति नाम्ना कृता आसीत्। भारते ब्रिटिशशासनम् केवलं उपनिवेशान्तर्गतं वर्तते एतदर्थं तस्य स्थापना कृतासीत्। तस्मिन् काले ब्रिटिशसाम्राज्याभ्यन्तरे आस्ट्रेलिया-कनाडा-दक्षिणअफ्रीका-न्यूजीलैण्ड-न्यूफाउण्डलैण्ड इत्येते उपनिवेशरूपेण स्थापिता आसन्।

प्रथमविश्वयुद्धस्य आरब्धे सति भारतीयराष्ट्रियक्रांग्रेसस्य अहिंसकसमर्थकैः (नरमपन्थी) ब्रिटेनसाहाय्यस्य निश्चयकृतः। भारतीयराष्ट्रियकांग्रेसस्य तत्र विचारः आसीत् यत् ब्रिटेनसाहाय्यानन्तरं शक्यते यत् ब्रिटेनदेशः भारतं स्वतन्त्रं करिष्यति। परन्तु शीघ्रमेव कांग्रेसजनाः अनुभूतवन्तः यत् ब्रिटिशजनाः कदापि इत्थं न करिष्यन्ति ततः भारतीयाः असन्तुष्टाः नेतारः अन्यं मार्गम् अन्वेष्टुमारब्धवन्तः। एवंविधासन्तुष्टता एव होमरूलान्दोलनस्य कारणत्वेन जाता। १९१५-१९१६तमवर्षमध्ये होमरूललीग इत्यस्य स्थापना जाता। 'पुणे होम रूल लीग' स्थापना बालगंगाधरतिलकेन मद्रासहोमरूललीगस्य च स्थापना एनीबेसेंट इत्यनेन कृता। होमरूललीगसंस्था भारतीयराष्ट्रियकांग्रेस्य सहायकसंस्थावत् कार्यरता आसीत्। एतस्यान्दोलनस्य उद्देश्यं स्वराज्यप्राप्तिरासीत् परन्तु अस्मिन् आन्दोलने शस्त्रप्रयोगानुमतिर्नासीत्। १९२० तमवर्षे अखिलभारतीय-होमरूलसंस्थया महात्मगान्धी एतस्याः अध्यक्षरूपेण निर्वाचितः। वर्षाभ्यन्तरे इदं सङ्घटनं संयुक्तभारतीय- राजनैतिकदलाय भारतीयराष्ट्रियकांग्रेसदेले विलयीकृतः एतस्य च नैजास्तित्वं समाप्तम्। होमरूलान्दोलनं वैधानिकान्दोलनमासीत्। एतस्य प्रमुखोद्देश्यानि निम्नलितिानि आसन् -

१. एतस्योद्देश्यं भारते स्वशासनप्राप्तिरासीत्। ऐनीबेसेन्टः इच्छति स्म यत् भारतदेशोऽपि तथैव स्वराज्यं प्राप्नुयात् यथा ब्रिटिशसाम्राज्यस्य अन्योपनिवेशेषु आसीत्।
२. एतस्यान्दोलनस्य उद्देश्यं न तु आङ्ग्लीयां भारतात् बहिष्कारः आसीत् न चैव युद्धप्रयत्नेषु बाधोत्पादनम् आसीत्।
३. होमरूलस्य उद्देश्यं भारतीयराजनैतिकाः जनाः उग्रधारां प्रति न गच्छेयुरित्यपि आसीत्।
४. युद्धकाले भारतीयराजनीतिः शिथिला जातासीत् अपि च सक्रियकार्यक्रमस्य प्रभावशालिनः च नेतृत्वाभावे राष्ट्रियान्दोलनस्य प्रगतिमार्गः अवरुद्धः जातः।

बालगंगाधरतिलकः षडवर्षात्मककारागारदण्डभोगानन्तरं १९१४ तमे वर्षे जूनमासस्य च १६दिनांके मोचितः। तेन चिन्तितं यत् आदौ कांग्रेसदले सम्मिल्य अन्ये अपि हिंसककार्यकर्तारः (गरम पंथी) तत्र सम्मिलिताः भवेयुः। तिलकस्य विश्वासः आसीत् यत् भारतीयराष्ट्रियकांग्रेसदलं भारतीयराष्ट्रियान्दोलनस्य पर्यात्वेन जातम्, तथा च एतस्य आज्ञां विना किमपि आन्दोलनं साफल्यं न प्राप्स्यति।

दिसम्बरमासे १९१५ तमवर्षे कांग्रेसस्य वार्षिकाधिवेशनं जातं, तत्र च तिलकस्य ऐनीबेसन्टस्य च प्रयोगैः साफल्यमधिगतम्। हिंसकदलीयाः (गरमपंथी) अपि कांग्रेसे सम्मिलिताः भविष्यन्ति इति निर्णीतम्। तिलकः पुनः कांग्रेसदलं प्रवेक्ष्यति इति अधिकारः प्रदत्तः अपि च तत्र कोऽपि विशिष्टसंकल्पः अपि नैव कृतः, अतः तेन १९१६तमवर्षे बेलगांवमध्ये प्रान्तीयसम्मेलने होमरूललीग इति संघटनस्य घोषणा कृता।

होमरूलान्दोलनेन यथा कथञ्चित् प्रसारः आरब्धः तदैव सर्वकारेणापि दमनात्मकक्रियाः तीव्रीकृताः। एतस्मिन् आन्दोलने आक्रमणाय सर्वकारेण विशिष्टदिनं निश्चितम्। जुलैमासे २३ दिनांके १९१६ तमवर्षे तिलकस्य ६०तमजन्मदिवसः आसीत्। वृहत्-सभायाः आयोजनं कृतम् अपि च तिलकाय लक्षरूप्यकाणां स्यूतः उपहाररूपेण दत्तः। सर्वकारेण अस्मिन् अवसरे द्वितीयपुरस्काररूपेण तस्मै कारण-बोधयतु इति सूचनापत्रं प्रदत्तं तत्र लिखितमासीत् यत् भवतः गतिविधीनां कारणात् भवतः उपरि प्रतिबन्धः कथं न स्यात्। सः षष्ठीसहस्ररूप्यकदण्डेन दण्डितः। तिलकाय प्रायः महत्त्वपूर्णोपहारः अयमासीत्। तिलकेन प्रोक्तं यत् अधुना होमरूल-आन्दोलनं वनवह्निवत् प्रसारं गमिष्यति। सर्वकारदमनात् विद्रोहविस्तारः भविष्यति।

लक्ष्मणपुरकांग्रेसाधिवेशने तिलकः पुनः कांग्रेसदले सम्मिलितः। अध्यक्षाम्बिकाचरणमजूमदारः अवदत्-'१०वर्षाणां सुखदकार्यकालान्तरं कांग्रेसजनाः अवगतवन्तः यत् ऐक्यमेव जयः अनैक्यमेव पराजयो वर्तते। अधुना पुनः सर्वैः दलैः मिलित्वा संघर्षः करणीयः।' अस्मिन् अधिवेशने महत्त्वपूर्णः कांग्रेसलीगसन्धिः जातः, यः लखनऊपैक्ट इति नाम्ना ज्ञायते। अस्मिन् सन्धौ एनीबेसेन्टः तिलकश्च महत्त्वपूर्णभूमिकाम् उढवन्तौ। मदनमोहनमालवीयसमेताः नैके वरिष्ठनेतारः तयोः विरोधिनः आसन्।

होमरूलान्दोलनस्य वर्धितप्रभावं दृष्ट्वा सर्वकारस्य चिन्ता स्वाभाविकी आसीत्। मद्रासर्वकारः कठोरतया व्यवहरति स्म। छात्रराजनैतिकोपवेशनानां प्रतिबन्धः कृतः। समग्रे प्रदेशे विरोधो जातः। तिलकोऽवदत् यत् सर्वकारः जानाति यत् देशप्रेमभावाः छात्राणाम् उद्वेलनं कुर्वन्ति। तदा तिलकः विदेशे आसीत् बेसेन्टः च असमर्था नेतृत्वाय आसीत्। परिणामतः आन्दोलनं नेतृत्वविहीनं जातम्।



होमरूलस्य महत्त्वपूर्णोपलब्धिः अयमासीत् यत् अनेन भाविराष्ट्रिययोद्धारः सज्जीकृताः। इत्थम् आन्दोलनं व्यर्थं नासीत्। भारतीयस्वातन्त्र्ये प्रभावः जातः। सुप्तभारतीयाः अनेन जागरिताः। राष्ट्रियान्दोलनेन च गतिः प्राप्ता। सर्वकारश्च नवीनसंशोधनानि कर्तुं बाध्यः कृतः।

**-प्रचार प्रसार विभागः**

**दि.स.अं**

# वर्तमान समये वेद वेदाङ्गस्य महत्त्वम्

**–मनोजकुमारडिमरी**

भारतवर्षे वैदिक काले वैदिकी संस्कृति सभ्यतायाः संस्कृत भाषाया पठन् पाठन् परमपरायाश्च परिपालनं सर्वोत्कृष्टत्वेन सादरम् सर्वे सदैव अनुपालनं क्रियतेस्मः। वैदिक परमपरामनुपालनं सर्वे सुखिन्नोऽपि आसन् यतोहि तस्मिन् काले सर्वं समर्प्य समेषां विद्याध्ययनस्य एकमेव उद्देश्यं आसीत् **''मोक्ष प्राप्ति''। सा विद्याया विमुक्तये''** तात्कालीना शिक्षाया ध्येय वाक्यं आसीत्। परञ्च कालक्रमेण पाश्चात्य देशीयानाम् भारतम् विलुण्ठ्य पराजित्य च स्वकीया अप्रमाणिकी निर्मूला आङ्गल भाषा संस्कृति सभ्यता च प्रचार्यत्वेन निखिला वेद वेदाङ्गस्य शिक्षा व्यवस्था संकीर्णतां गता। तद्यावधि या भाषा सामान्य जनैः सुलभा सरला लोक पूज्याश्चासीत् सा मात्रमेव ब्राह्मणानां यज्ञानुष्ठानादि कार्यसम्पादनाय भारते अनायासेनैव प्रसिद्धा जाता। आङ्गल शासकैः स्वतन्त्रता पूर्वं भारतीयानां कृते या शिक्षा नीति उद्घोषिता सैव शिक्षा नीति स्वतन्त्रता प्राप्तिरनन्तरमपि भारतस्य तात्कालीनैः शासकैः न अवरोधिता। तस्यैव दुस्प्रभावेण आङ्गलभाषा अस्माकीनां रोम्णि रोम्णि विषाणुरिव व्याप्ता जाता।

अनुभवसिद्धमिदं सैव भाषा लोकविश्रुता या अर्थकरी जीवननिर्मात्री मान-सम्मान प्रदात्री राज्याश्रयी च भवति अद्यत्वे प्रत्येकस्मिन् विद्यालये विश्वविद्यालये देशे विदेशे वा आङ्गलभाषाम् विना गतिर्नास्ति तर्हि वयं कथं विश्वासं कुर्मः यत् वर्तमान समये वेद वेदाङ्गस्य महत्त्वं अस्ति।






आयुर्वेदस्यैव परिवर्तित स्वरूपं फिजिक्स केमेस्ट्री बॉयलोजीम् अधीत्य छात्राः उच्चपदासीनं जायन्ते तत्रैव सतपथ प्रदर्शकानां वेद वेदाङ्गनाञ्च महद् ज्ञानं लब्ध्वापि छात्रा! इतस्ततः व्यवसायन्वेषणाय परिभ्रमन दुःखिता दृश्यन्ते। संस्कृतभाषायाम् निहितानि वेद, पुराण, स्मृति, उपनिषदादि ग्रन्थानि अद्य केवलं सम्माननार्थं दर्हि दृश्यन्ते। वेद-वेदाङ्गेषु मानवी रचनाया गूढातिगूढ रहस्यानि वर्तन्ते वर्तमानपरिपेक्षे मानवः मानवं दृष्ट्वा भयभीतः सन्तः, प्राणी मात्रस्य ध्वंसनाय अहर्निशम् अणु परमाणुनाम् निर्माणम् रतोऽस्ति एतादृशी अवस्था भक्ष्याभक्ष्य गमाना-गमन सतपथ प्रदर्शका वेद वैदाङ्गानां महत्त्वं न उपेक्षते यतोहि-मित्रस्य मित्रं प्रति पुत्रस्य पितरं प्रति कनिष्ठस्य ज्येष्ठम् प्रति कीदृशो व्यवहारः भवेत् तस्य वर्णनं वेद वेदाङ्गेषु एव प्राप्यते सदाचारस्य आहार विहारस्य व्यवहारस्य च सर्वोतमा शिक्षा वेद् वाक्येषु एव उपलभ्यन्ते यथा भद्रं कर्णेभिः। **शृणुयाम देवा भद्रमपशेममाक्षभियत्राः** इत्थमेव....................

**ईशावाष्यामिदं सर्वं यत्किञ्चित् जगत्याम् जगत।**
**तेन त्यक्तेन भुञ्जिथा मागृद कस्य स्विद् धनं** ।।

अनेनैव विश्वं कुटुम्बम् मत्वा आत्मवत सर्व भूतेषु यः पश्यति सः पण्डितः सूक्तिरियमनुशृत्य **मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षामहे।** वेद मन्त्रेऽस्मिन् प्राणि मात्रम् प्रति समुज्वला सद्भावना दर्हि दृरिदृश्यते।

**-सम्पादक सहायकः**
**दि.सं.अ.**

# व्यावहारिक संस्कृत शिक्षणम्

## व्यावहारिक संस्कृत वाक्यानां प्रयोगः

### कारक विभक्ति तालिका

**कर्ता-कर्म च करणं सम्प्रदानं तथैव च**
**अपादानाधिकरणे इत्याहु कारकाणि षट्**

| कारकः | विभक्तिः | चिह्नम् | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|
| कर्ता | प्रथमा | ने | सु (स) | औ | जस् (अः) |
| कर्म | द्वितीया | को | अम् | औट् | शस् (अः) |
| करण | तृतीया | से के द्वारा | टा (आ) | भ्याम् | भिस् (भिः) |
| सम्प्रदान | चतुर्थी | को, के लिए | ङे. (ऐ) | भ्याम् | भ्यस् (भ्यः) |
| अपादान | पञ्चमी | से पृथक | ङसि (अः) (आत्) | भ्याम् | भ्यस् (भ्यः) |
| सम्बन्ध | षष्ठी | का,के,की | ङस (अः) (स्य) | ओस् (ओः) | आम् |
| अधिकरण | सप्तमी | में, पर | ङि (इ) (ऐ) | ओस् | सुप् |
| सम्बोधन | सम्बोधन | हे, अरे | सु | औ | जस् (अः) |



**कर्ता कारकः -**
१. अध्यापकः लिखति।
२. पिता ताडयति।
३. छात्राः गच्छन्ति।
४. त्वं धावसि।
५. वयं क्रीडामः।

**कर्म कारकः -**
१. सा कथां शृणोति।
२. भक्तः हरिं भजति।
३. वयं गुरुं प्रणमामः।
४. अहं शास्त्रम् जानामि।
५. त्वां गां क्रीणसि।

**करण कारकः-**
१. राजा रथेन गच्छति।
२. अहं हस्तेन लिखामि।
३. सः चरणाभ्यां चलति।
४. मोहनः सुखेन खादति।
५. कमला हस्तेन पत्रं लिखति।



**सम्प्रदान कारकः-**

१. सः ज्ञानाय पठति।

२. देशभक्तः देशाय प्राणान् यच्छति।

३. रामः विभीषणाय राज्यम् अयच्छत्।

४. त्वं पठनाय गच्छसि।

५. अहं तस्यै पुस्तकम् आनयामि।

**अपादान कारकः-**

१. धर्म पापात् रक्षति।

२. गीता आश्रमात् आगच्छति।

३. अहं गृहात् गच्छामि।

४. आवां गुरोः पठावः।

५. सोहनः नगरात् आगच्छति।

**सम्बन्ध कारकः**

१. यमुनायाः जलं पवित्रम् अस्ति।

२. वृक्षस्य शाखायाम् फलानि सन्ति।

३. सीता रामस्य भार्या आसीत्।

४. त्वम् तस्य मित्रम् असि।

**अधिकरणं कारकः-**

१. शिशु मातुः अङ्के क्रीडति।

२. वसन्ते पुष्पाणि विकसन्ति।

३. अहम् अस्मिन् पुस्तकालये पठामि।

४. वयं पुस्तकेषु पश्यामः।

५. त्वं कस्यां कक्षायां पठसि।?

**सम्बोधन कारकः-**

१. हे राम माम् पालय।

२. हे प्रभो! तव महिमानं को ज्ञातुं शक्नोति।

३. हे कृष्णं अत्र आगच्छ।

४. हे पार्थ तत्र गच्छ।

## शब्द-रूपम्

### देव

| विभक्ति | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | देवः | देवौ | देवाः |
| द्वितीया | देवम् | देवौ | देवान् |
| तृतीया | देवेन | देवाभ्याम् | देवैः |
| चतुर्थी | देवाय | देवाभ्याम् | देवेभ्यः |
| पञ्चमी | देवात् | देवाभ्याम् | देवेभ्यः |
| षष्ठी | देवस्य | देवयोः | देवानाम् |
| सप्तमी | देवे | देवयोः | देवेषु |
| सम्बोधनम् | हे देव! | हे देवौ! | हे देवाः! |

### महर्षि

| विभक्ति | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | महर्षिः | महर्षी | महर्षयः |
| द्वितीया | महर्षिम् | महर्षी | महर्षीन् |
| तृतीया | महर्षिणा | महर्षिभ्याम् | महर्षिभ्यः |
| चतुर्थी | महर्षये | महर्षिभ्याम् | महर्षिभ्यः |
| पञ्चमी | महर्षेः | महर्षिभ्याम् | महर्षिभ्यः |
| षष्ठी | महर्षेः | महर्ष्योः | महर्षीणाम् |
| सप्तमी | महर्षौ | महर्ष्योः | महर्षिषु |
| सम्बोधनम् | हे महर्षि! | हे महर्षी ! | हे महर्षयः! |

### रात्रि

| विभक्ति | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | रात्रिः | रात्री | रात्रयः |
| द्वितीया | रात्रिम् | रात्री | रात्रीः |
| तृतीया | रात्र्या | रात्रिभ्याम् | रात्रिभिः |
| चतुर्थी | रात्रये, रात्र्यै | रात्रिभ्याम् | रात्रिभ्यः |
| पञ्चमी | रात्रेः, रात्र्याः | रात्रिभ्याम् | रात्रिभ्यः |
| षष्ठी | रात्रेः, रात्र्याः | रात्र्योः | रात्रीणाम् |
| सप्तमी | रात्रौ, रात्र्याम् | रात्र्योः | रात्रिषु |
| सम्बोधनम् | हे रात्रे! | हे रात्री ! | हे रात्रयः! |

## युवन् ( जवान ) हलन्त शब्दः पुंल्लिग

| विभक्ति | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | युवा | युवानौ | युवानः |
| द्वितीया | युवानम् | युवानौ | यूनः |
| तृतीया | यूना | युवभ्याम् | युवभिः |
| चतुर्थी | यूने | युवभ्याम् | युवभ्यः |
| पञ्चमी | यूनः | युवभ्याम् | युवभ्यः |
| षष्ठी | यूनः | यूनोः | यूनाम् |
| सप्तमी | यूनि | यूनोः | युवसु |
| सम्बोधनम् | हे युवन्! | हे युवानौ! | हे युवान्! |

## धातु रूपम् दृश ( पश्य ), ( देखना )

### ( लट् लकार )

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष– | पश्यति | पश्यतः | पश्यन्ति |
| मध्यमपरुष– | पश्यसि | पश्पथः | पश्यथ |
| उत्तमपुरुष– | पश्यामि | पश्यावः | पश्यामः |

### ( लोट् लकार )

| | | | |
|---|---|---|---|
| प्रथमपुरुष– | पश्यतु | पश्यताम् | पश्यन्तु |
| मध्यमपरुष– | पश्य | पश्यतम् | पश्यत |
| उत्तमपुरुष– | पश्यानि | पश्याव | पश्याम |

### ( लङ् लकार )

| | | | |
|---|---|---|---|
| प्रथमपुरुष– | अपश्यत् | अपश्यताम् | अपश्यन् |
| मध्यमपरुष– | अपश्यः | अपश्यतम् | अपश्यत |
| उत्तमपुरुष– | अपश्यम् | अपश्याव | अपश्याम |

### ( विधिलिङ् लकार )

| | | | |
|---|---|---|---|
| प्रथमपुरुष– | पश्येत् | पश्यताम् | पश्येषुः |
| मध्यमपरुष– | पश्येः | पश्येतम् | पश्येत |
| उत्तमपुरुष– | पश्येयम् | पश्येव | पश्येम |

( लृट् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | द्रक्ष्यति | द्रक्ष्यतः | द्रक्ष्यन्ति |
| **मध्यमपुरुष–** | द्रक्ष्यसि | द्रक्ष्यथः | द्रक्ष्यथ |
| **उत्तमपुरुष–** | द्रक्ष्यानि | द्रक्ष्यावः | द्रक्ष्यामः |

## घ्रा जिघ्र ( सूंघना ),

( लट् लकार )

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुष–** | जिघ्रति | जिघ्रतः | जिघ्रन्ति |
| **मध्यमपुरुष–** | जिघ्रसि | जिघ्रथः | जिघ्रथ |
| **उत्तमपुरुष–** | जिघ्रामि | जिघ्रावः | जिघ्रामः |

( लोट् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | जिघ्रतु | जिघ्रताम् | जिघ्रन्ति |
| **मध्यमपुरुष–** | जिघ्र | जिघ्रतम् | जिघ्रत |
| **उत्तमपुरुष–** | जिघ्राणि | जिघ्राव | जिघ्राम |

( लङ् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | अजिघ्रत् | अजिघ्रताम् | अजिघ्रम् |
| | अजिघ्रः | अजिघ्रतम् | अजिघ्रत |
| | अजिघ्रम् | अजिघ्राव | अजिघ्राम |

( विधिलिङ् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | जिघ्रेत् | जिघ्रेताम् | जिघ्रेयुः |
| **मध्यमपुरुष–** | जिघ्रेः | जिघ्रेतम् | जिघ्रेथ |
| **उत्तमपुरुष–** | जिघ्रेयम् | जिघ्रेव | जिघ्रेमः |

( लृट् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | घ्रास्यति | घ्रास्यतः | घ्रास्यन्ति |
| **मध्यमपुरुष–** | घ्रास्यसि | घ्रास्यथः | घ्रास्यथ |
| **उत्तमपुरुष–** | घ्रास्यामि | घ्रास्यावः | घ्रास्यामः |

## लिख् ( लिखना )

### ( लट् लकार )

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुष–** | लिखति | लिखतः | लिखन्ति |
| **मध्यमपरुष–** | लिखसि | लिखथः | लिखथ |
| **उत्तमपुरुष–** | लिखामि | लिखावः | लिखामः |

### ( लोट् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | लिखतु | लिखताम् | लिखन्तु |
| **मध्यमपरुष–** | लिख | लिखतम् | लिखत |
| **उत्तमपुरुष–** | लिखामि | लिखावः | लिखाम |

### ( लङ् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | अलिखत् | अलिखताम् | अलिखन् |
| **मध्यमपरुष–** | अलिखः | अलिखतम् | अलिखत |
| **उत्तमपुरुष–** | अलिखम् | अलिखाव | अलिखाम |

### ( विधिलिङ् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | लिखेत् | लिखेताम् | लिखेयुः |
| **मध्यमपरुष–** | लिखेः | लिखतम् | लिखेत |
| **उत्तमपुरुष–** | लिखेयम् | लिखेव | लिखेमः |

### ( लृट् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | लेखिष्यति | लेखिष्यतः | लेखिष्यन्ति |
| **मध्यमपरुष–** | लेखिष्यसि | लेखिष्यथः | लेखिष्यथ |
| **उत्तमपुरुष–** | लेखिष्यामि | लेखिष्यावः | लेखिष्यामः |

**–सम्पादक सहायकः**
**दिल्ली संस्कृत अकादमी**

सुरुचिपूर्ण मासिक बाल संस्कृत पत्रिका

# "संस्कृत-चन्द्रिका"

नैतिक-मूल्यों के साथ-साथ
सम्पूर्ण देश के बाल-साहित्यकारों तथा नवोदित प्रतिभाओं
की लेखनी की संयुक्त प्रस्तुति

## "संस्कृत-चन्द्रिका"

( आई.एस.एस.एन.-2347–1565 )

संस्कृत भाषा के प्रचार-प्रसार हेतु प्रयत्नशील दिल्ली संस्कृत अकादमी, दिल्ली सरकार द्वारा सरल संस्कृत-भाषा में प्रकाशित एक ऐसी सुरुचिपूर्ण एवं ज्ञान-विज्ञान तथा नैतिक शिक्षा की बाल- मासिक पत्रिका जो प्रत्येक वर्ग के पाठक-समुदाय की अपेक्षा के

**मूल्यः- एक प्रति रु.२५/- मात्र, वार्षिक सदस्यता शुल्क रु. २५०/- मात्र**

सुरुचि सम्पन्न स्वस्थ सकारात्मक अभिव्यक्ति की संवाहिका

## "संस्कृत-चन्द्रिका"

**के स्थायी अध्येता बनें।**

आज ही अपना वार्षिक सदस्यता शुक्ल नगद, मनिआर्डर अथवा दिल्ली में भुनाये जाने योग्य बैंक ड्राफ्ट दिल्ली संस्कृत अकादमी के नाम से भिजवाकर सदस्यता प्राप्त करें। शुल्क मल्टी सिटी चैक द्वारा भी स्वीकार्य होगा।

पत्र व्यवहार का पता --

**सचिव/ सम्पादक, दिल्ली संस्कृत अकादमी, दिल्ली सरकार**

**प्लाट सं.-५ झण्डेवालान, करोलबाग, नई दिल्ली-११०००५**

**दूरभाष सं.- ०११-२३६३५५९२, २०९२०३६३**

RNI No.
DELSAN/2002/8921

प्रकाशक एवं मुद्रक सचिव, दिल्ली संस्कृत अकादमी
के स्वामित्व में अकादमी के कार्यालय प्लाट सं.–५,
झण्डेवालान, करोलबाग, नई दिल्ली–११०००५
से प्रकाशित